## अध्याय : ९ chapter-9

उलूक उवाच ।।
इतीदमुक्तमखिलं पूर्वजन्मसमुद्भवम् ।।
स्वरूपमायुषो हेतुः कौशिकत्वस्य चेति मे ।। १

इत्युक्तवा विरते तस्मिन्पुरुहूतसनामनि ।।
नाडीजंघो बको मित्रमाह तं दुःखितो वचः ।। २

नाडीजंघो उवाच[1] ।।
यदर्थं वयमायाता स्तान्न सिद्धं महामते[2] ।।
कार्यं तन्मरणं नूनं त्रयाणामप्युपागतम् ।। ३

इंद्रद्युम्नापरिज्ञाने भद्रकोऽयं मुमूर्षति ।।
तस्यानुमित्रं मार्कण्डस्तं चान्वहमपि स्फुटम् ।। ४

मित्रकार्ये विनिवृत्ते[3] म्रियमाणं निरीक्षते ।।
यो मित्रं जीवितं तस्य धिक्स्निगृधं दुरात्मनः ।। ५

तदेतावनुयास्यामि म्रियमाणावहं द्विज[4] ।।
आपृच्छे त्वां नमस्कार आश्लेषाश्चाथ पश्चिमः ।। ६

प्रतिज्ञातम[5] निष्पाद्य मित्रस्याभ्यागतस्य च ।।
कथंकारं न लज्जंति हताशा जीवितेप्सवः ।। ७

---

१ ब प्रतौ इत्थंम पाठः नास्ति ।
२ ब मने ।
३ अ वृष्ठो
४ ब द्विजः
५ ब प्रतिज्ञान

तस्माद्वह्निं प्रवेक्ष्यामि सार्धमाभ्याम संशयम् ।।
आपृष्टोऽस्यधुना स्नेहान्मम देहि जलांजलिम् ।। ८

इत्युक्तवत्युलूकोऽसौ नाडीजंघे सगद्गदम्[1]।
साश्रुनेत्रं स्थिरीभूय प्राहवाचं सुधामुचम् ।। ९

[2]उलूकउवाच ।।
मयि जीवति मित्रे मे भवान्मरणमिति चे ।।
मद्यप्रभुति कस्तर्हिहृद्दा मम लभिष्यति ।। १०

अस्त्युपायो महानत्र गन्धमादन पर्वते ।।
मत्तश्चिरायुर्मित्रोस्ति गृध्रः प्राणासम सुहृत् ।। ११

स विज्ञास्यति वोऽभिष्टमिंद्रद्युम्नं महीपतिम् ।।
इत्युक्त्वा पुरतस्तस्थावुलूकः स च भूपतिः ।। १२

मार्कंडेयो बकश्चैव प्रययुर्गंधमादनम् ।।
तमायां तमथालोक्य वयस्यं पुरतः स्थितम् ।। १३

स्वकुलायात्प्रहृष्टोऽसौ गृधः संमुखमाययौ ।।
कृतसंविदसौ पूर्वं स्वागतासन भोजनैः [3] ।। १४

---

१ अ [redacted] सगद्गदः
२ ब प्रतौ इत्यंय पाठः नास्ति ।
३ अ भाजनैः

उलूकं गृध्रराजश्च कार्यं पप्रच्छ तं तथा ।।
सचाचख्यावयं मित्रं बको मे ऽस्य मुनिश्च किल ।। १५

[1]मुनिरपि तृतीयो ऽयं मित्रं चार्थयिमुद्यतः ।।
इंद्रद्युम्न परिज्ञाने स्वयं जीवति नान्यथा ।। १६

वह्निं प्रवेक्ष्यति व्यक्तमयं तदनु वै वयम् ।।
मया निष्द्धोर्यं ज्ञात्वा त्वां निरंतनमात्मना ।। १७

तच्चेज्जनासि[2] तं ब्रूहि चतुर्णा देहि जीवितम् ।।
सरंक्ष्यास्ब्रुहि[3] सत्कीर्तिं क्षयं चाखिलपाप्मनः ।। १८

गृध्र उवाच ।।
षाटपंचाशद्धितीता मे कल्पा जातस्य कौशिकश्च ।।
न दृष्टो न श्रुतो ऽस्माभिरिंद्रद्युम्नो महीपतिः ।। १९

तच्छ्रुत्वा विस्मयाविष्ट इंद्रद्युम्नो ऽपि दुःखितः ।।
पप्रच्छ जीविते हेतुमति मात्रे विहंगमम् ।। २०

गृध्र उवाच ।।
श्रुणु भद्र पुरा जातो मर्कटो ऽहं चापलः
आसं कदाचिद भवद्वसंतो ऽथ ऋतुः क्रमात् ।। २१

---

१ अ प्रती पृष्ठांक ५४ नास्ति । अतः श्लोकांकाः १६ । ४१ न सन्ति ।

२ ब जानासि

३ ब ब्रुहि

तत्राग्रे[1] देवदेवस्य वनमध्ये शिवालये ।।
भवोद्भवस्य पुरतो जगद्योगेश्वराभिधे ।। २२

चतुर्दशीदिने हस्तनक्षत्रे[2] हर्षणाभिधे ।।
योगे चैत्रे सिते पक्ष आसीद्दमनकोत्सवः ।। २३

अत्र सौवर्ण्य[3] दोलायां लिंग आरोपिते जनैः ।।
निशायामधिरुह्याऽहं दोलां तां च व्यचालयम् ।। २४

निसर्गाज्जाति चापलया च्चिरकालं पुनःपुनः ।।
अथ प्रभात आयाता जनाः पूजाकृते कपिम् ।। २५

दोलाधिरूढमालोक्य लकुटैर्मां व्यताडयन् ।।
दोलासंस्थित एवाहं प्रमीतः[4] शिवमंदिरे ।। २६

तेषां प्रहारैः सुदृढैर्बहुभिर्वज्रदुःसहैः ।।
शिवांदोलन माहात्म्याज्जातोऽहं नृप मंदिरे ।। २७

काशीश्वरस्य तनयः प्रतीतोऽस्मि कुशध्वजः ।।
जातिस्मरस्ततो राज्ये क्रमात्प्राप्याहमीश्वरम् ।। २८

---

१ ब तत्राजाग्रे
२ G. ब्र. चित्रानक्षेत्रे
३ ब सुवर्ण
४ ब प्रमतः

कारयामि धरापृष्ठे चैत्रे दमनकोत्सवम् ।।
यथा यथा ब्र दोलयति शिवं दोलास्थितं नरः ।। २९

तथा तथाऽशुभं याति पुण्यमायाति[1] भद्रक ।।
शिवदीक्षामुपागम्याखिलसंस्कारसंस्कृतः ।। ३०

शिवाचार्यै विमुक्तोऽहं पशुपाशैस्तदागमात् ।।
निर्वाहदीक्षापर्यंतान्संस्कारान्प्राप्य सर्वतः ।। ३१

आराधयामि देवेशं प्रत्यकिचत्तमुमापतिम् ।।
समस्तक्लेश विच्छद कारणं जगतीं गुरुम् ।। ३२

चित्तवृत्तिनिरोधेन वैराग्याभ्यास योगतः ।।
जपन्नुद्गीतमस्यार्थं भावयन्नष्टमूं रसम् ।। ३३

ततो मां प्रणिधानेनाभ्यासेन दृढभूमिना ।।
अन्तरायानुपहतं ज्ञात्वा तुष्टोऽब्रवीद्धरः ।। ३४

ईश्वर उवाच ।।
कुशध्वजाहं तुष्टोद्य वरं वरय वांछितम् ।।
न हीदृशमनुष्ठानं कस्याप्यस्ति महीतले ।। ३५

---

१ ब पुण्या

श्रुत्वेत्युक्तवा[1] मया शम्भुर्भूयासं ते[2] गणो ह्यहम् ।।
अनेनैव शरीरेण तथेत्येवाहगो प्रभुः ।। ३६

ततः कैलासमानीय विमानं ममचादिशत् ।।
सर्वरत्नमयं दिव्यं दिव्याश्चर्यं समावृतम् ।। ३७

विचरामि प्रतीतोऽहं तदारुढो यदच्छ्या ।।
अथ काले कियन्मात्रे व्यतीतेऽत्रैव पर्वते ।। ३८

गवाक्षाधिष्टितोऽपश्यं वसंते मुनिकन्यकाम् ।।
प्रवाति दक्षिणे वायौ मदनाग्निप्रदीपितः[3] ।। ३९

अग्निवेश्यसुतां भद्र विवस्त्रां जलमध्यगाम् ।।
उद्भिन्न यौवनां श्यामां मध्यक्षामां मृगेक्षणाम् ।। ४०

विस्तीर्णजघनाभोगां रंभोरुं संहतस्तनीम् ।।
तामंकुरितलावण्यां जलसेका दिवाग्रतः ।। ४१

प्रोन्निद्रपंकजमुखीं वर्णनीयतमाकृतिम् ।।
यथाऽप्रज्ञानयास्यमि द्विद्धिभिरपि वर्णिनीम् ।। ४२

---

१ ब इति श्रुत्वा वचः (शब्ददा: भिन्नत्वमस्ति)
२ ब गणेश्वरः ।। (न तु ह्यहम् )
३ ब प्रदीपिने

प्रोद्यत्कटाक्ष विक्षेपैः शरव्रातैरिव स्मरः ।।
स्वयं[1] तदंगमास्थाय ताडयामास मा दृढम् ।। ४३

वयस्यासंवृतामेवं खेलमानां यदृच्छया ।।
अवतीर्याहम् हरं विमानान्मदनातुरः ।। ४४

सा गृहीता मया दीर्घं प्रकुर्वाणा महास्वनम्[2] ।।
ताततेति च विमानस्था रुरोदातीव भद्रक ।। ४५

ततो वयस्यास्ता दीना मुनिमाहुः प्रधाविताः ।।
वैमानिकेन केनापि ह्रियते तव पुत्रिका ।। ४६

रुदन्तीं भगन्नेतां त्राहृमुत्तिष्टेति सर्वतः ।।
तासां तदाकर्ण्य वचो मुनिर्भद्रतपोनिधिः ।। ४७

अग्निवेश्यो भ्य गात्तस्या व्योमन्युपपदं त्वरन् ।।
तिष्ठतिष्ठेति मामुक्त्वा संस्तभ्य तपसा गतिम् ।। ४८

अग्निवेश्य उवाच ।।
यस्मान्मदीया तनया मांशपेशीव ते त्द्दुता ।। ४९

---

१ ब स्वायं
२ अ. ब महारवम् ।।

गृधेणेवाऽधुना व्योम्नि तस्माद्गृधो भवद्रुतम् ।।
अनिच्छती मदीयेयं सुता बाला तपस्विनी ।। ५०

त्वया त्द्रताधुनास्यैतत्फलमाप्नुहि दुर्मति ।।
इत्याकर्ण्य भयाविष्टो लज्जयाधोमुखो[१] मुनेः ।। ५१

पादौ प्रगृह्य न्यपतं रुदन्नति तरां तदा ।।
न मयेयं परिज्ञाय त्वदता नाद्यापि धर्षिता ।। ५२

प्रसादं कुरु ते शापं व्यावर्तय तपोनिधे ।।
प्रणतेषु क्षमावन्तो निसर्गेण तपोधनाः ।। ५३

भवंति संतस्तद् गृधो मा भवेयं प्रसीद मे ।।
इति प्रपन्नेन मया प्रणतोऽसौ महामुनिः ।। ५४

प्रसन्नः प्राह नो मिथ्या मम वाक्यं भवेत्क्वचित् ।।
किं त्विंद्रद्युम्न भूपाल परिज्ञाने सहायताम् ।। ५५

यदा यास्यसि शापस्य तदा मुक्तिमवाप्स्यसि ।। ५६

---

१ ब प्रतौ "मुखो" नास्ति ।

इत्युक्त्वा स मुनिः प्रायाद्गृहीत्वा निजकन्यकाम् ।।
अखंडशीलां स्वावासमहं गृध्रीऽभवं तदा ।। ५७

एवं तदा दमनकोत्सव ईश्वरस्य आंदोलनेन कृष-
नृपवेश्मनि मेऽवतारः ।।
शम्भोर्गणात्वमऽभवच्च तथा द्विजवेश्यऽशापेन
गृध्रइहभद्र तवेदमुक्तम् ।। ५८

१ इति श्री स्कांदे .............. महीप्रादुर्भावे दमनकमाहात्म्यं
नाम नवमोऽध्यायः ।।

---

१ अ. ब इति श्री स्कंदपुराणे कुमारिकाखंडे नवमोध्यायः ।